# ४ चतुर्थ दशकः - मधुकैटभ वधः

त्वं तामसी सुप्तर माधवाङ्गजा श्यामा रुचा मोहन ताम्र लोचना ।
एकार्णवे घोर रणोत्सुकान् हरिं दैत्यौ च तौ स्मेरमुखी समैक्षथाः ॥ ४-१॥

पश्यत्यजे बाहुरणं मुरारिणा कृत्वा मधुः श्रान्ति मवाप सत्वरम् ।
अभ्येत्य युद्धं कुरुते स्म कैटभः श्रान्ते च तस्मिन्नकृताहवं मधुः ॥ ४-२॥

एवं मुहुः सङ्गर विश्रमावुभौ पर्यायतो वर्ष सहस्र पञ्चकम् ।
ग्लानिं विना चक्रतु रच्युतः क्लमात् विश्रान्ति मिच्छन्नसुरौ जगाद तौ ॥ ४-३॥

श्रान्तेन भीतेन च बालकेन च प्रभुः पुमान्नैव करोति संयुगम् ।
मध्येरणं द्वौ कृत विश्रमौ युवां एकः करोम्येव निरन्तराहवम् ॥ ४-४॥

ज्ञात्वा हरिं श्रान्त मुभौ विदूरतः सन्तस्थतु र्विश्रम सौख्यवांस्ततः ।
त्वामेव तुष्टाव कृपा तरङ्गिणीं सर्वेश्वरीं दैत्य जयाय माधवः ॥ ४-५॥

देवि प्रसीदैष रणे जितोऽस्म्यहं दैत्य द्वयेनाब्ज भवं जिघांसुना ।
सर्वं कटाक्षैस्तव साध्यमत्र मां रक्षेति वक्तार मभाषथा हरिम् ॥ ४-६॥

युद्धं कुरु त्वं जहि तौ मया भृशं सम्मोहितौ वक्र दृशेत्ययं त्वया ।
सञ्चोदितो हृष्टमना महार्णवे तस्थौ रणाया ययतुश्च दानवौ ॥ ४-७॥

भूयोऽपि कुर्वन् रण मच्युतो हसन् कामातुरौ ते मुखपद्म दर्शनात् ।
तावाह तुष्टो ऽस्म्यतुलौ रणे युवां ददाम्यहं वां वरमेष वाञ्छितम् ॥ ४-८॥

तावूचतु र्विद्धि हरे न याचकौ आवां ददावस्तव वाञ्छितं वरम् ।
नासत्यवाचौ स्व इतीरितो हरिः त्वां संस्मरन् शत्रु जिगीषयाऽब्रवीत् ॥ ४-९॥

मह्यं वरं यच्छ तमद्य मे यतो वध्यौ युवां स्यात मितीरितावुभौ ।
दृष्ट्वाऽप्सु लीनं सकलं समूचतुः त्वं सत्यवाङ्नौ जहि निर्जले स्थले ॥ ४-१०॥

अस्त्वेव मित्या दृतवाङ्मुदा हरिः स्वोरौ पृथा वुन्नमिते जलोपरि ।
कृत्वाऽरिणा तच्छिरसी तदाऽच्छिनत् स्वच्छन्द मृत्यू तव मायया हतौ ॥ ४-११॥

द्वेषश्च रागश्च सदा ममाम्बिके दैत्यौ हृदि स्तोऽत्र विवेक माधवः ।
आभ्यां करोत्येव रणं जयत्वयं तुभ्यं महाकालि नमः प्रसीद मे ॥ ४-१२॥

** नमस्ते शरण्ये शिवे सानुकम्पे नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्य पादारविन्दे नमस्ते सदा पाहिमां भद्रकालि ॥ **